87-88

॥ श्रीगणेशायनमः ॥

॥ कुमारसंभवम् ॥

॥ प्रथम सर्गः ॥

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः। पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः॥१॥

अस्तीति। उत्तरस्यां दिशि। अनेनास्य देवभूमित्वं सूच्यते॥ देवतात्माधिष्ठाता यस्य-सः। एतेनास्य वक्ष्यमाणमेनकापरिणय पार्वती जननादि चेतन व्यवहारयोग्यत्वं सिद्धः। हिमस्यालयः स्थानमिति हिमालयो नाम हिमालय इति प्रसिद्धः। आधिको राजाधिराजः। राजाहः सखिभ्यष्टच्। न गच्छन्तीति नगा। अचलास्तेषामधिराजो नगाधिराजोऽस्ति।

कथंभूतः। पूर्वापरौ प्राच्यपाश्चिमौ तोयनिधी समुद्रौ वगाह्य प्रविश्य। अतएव पृथिव्या भूमेर्मानं हस्तादिना परिच्छेदः। भावे ल्युट्। तस्य दण्डः। यद्वा मीयते ऽनेनेति मानम्। करणे ल्युट्। सचासौ दण्डश्च स इवास्थितः। आयामपरिच्छेदकदण्ड इव स्थितः इत्यर्थः। पूर्वापरसागरावगाहित्वं चास्य हिमालयस्यास्त्येव। उक्तं च ब्रह्माण्डपुराणे— "कैलासो हेमवांश्चैव दक्षिणे वर्षपर्वतौ॥ पूर्वपश्चिमगावेतावर्णवान्तरुपास्थितौ"॥ अत्र हिमाचलस्योभयाब्धि व्याप्तिसाम्यान्मानदण्डत्वेनोत्प्रेक्षणादुत्प्रेक्षालङ्कारः॥ "प्रकृते ऽप्रकृतगुणक्रियादि संबन्धादप्रकृतत्वेन प्रकृतस्य संभावनमुत्प्रेक्षा" इत्यलंकारसर्वस्वकारः। अस्मिन्सर्गे प्रायेण वृत्तमुपजातिः। क्वचिदिन्द्रवज्रोपेन्द्रवज्रे च। तल्लक्षणं तु— "स्यादिन्द्रवज्रा यदि तौ जगौ गः"। "उपेन्द्रवज्रा जतजास्ततो गौ"। "अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः" इति॥ १॥ इतःपरं षोडशभिः श्लोकैर्हिमाद्रिं वर्णयति। तत्र नगाधिराजत्वं निर्वोढुमाह—

यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे।

भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम्॥ २॥

यमिति॥ सर्वेऽपि ते शैलाश्च सर्वशैलाः। "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति समासः। यं हिमालयं वत्सं परिकल्प्य विधाय दोहदक्षे दोहनसमर्थे मेरौ दोग्धरि स्थिते सति। "यस्य च भावेन भावलक्षणम्" इति सप्तमी। पृथूपदिष्टां पृथुना वैन्येनोपदिष्टामादिष्टां प्रदर्शितां धरित्रीम्। गोरूपधरामिति शेषः। "गोर्भूत्वा तु वसुंधरा" इति विष्णुपुराणात्। "अकथितं च" इति कर्मत्वम्। भास्वन्ति च भासः सन्त्येषामिति भास्वन्ति द्युतिमन्ति। ओषधिविशेषणं चैतत्। "नपुंसकमनपुंसकेन—" इत्यादिना नपुंसकैकशेषः। रत्नानि माणिक्यादीनि श्रेष्ठवस्तूनि च। "रत्नं श्रेष्ठे मणावपि" इति विश्वः। "जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते" इति यादवः। महौषधीश्च संजीवनीप्रभृतीश्च दुदुहु—

त्वेन परिणता इति शेषः। "ताः क्षीरपरिणामिनीः" इति विष्णुपुराणात्। दु-
दुहुः। "दुहियाचि-" इत्यादिना द्विकर्मकत्वम्। अत्र प्रयोजनकत्वेऽपि शैला-
नां "पाक्षिकमिह तैः कर्षति ग्रामं ग्रामणीः" इतिवत्स्वतन्त्रमर्याचरणात्कर्तृत्वे-
ऽप्यकर्त्रभिप्रायविवक्षायां परस्मैपदम्। अत्रार्थे प्रमाणम्- "गौर्भूमिश्चैरताः
। सर्वे कर्तारोऽत्र पयांसि च। औषध्यश्चैव भास्वन्ति रत्नानि विविधानि च॥
वत्सश्च हिमवानासीद्दोग्धा मेरुर्महागिरिः॥" इति। एतेन वत्सस्य मातुः प्रे-
मास्पदत्वादस्य सारग्राहित्वं गम्यते। तथा चास्य नगस्य रत्नविशेषभोक्तृत्वा-
न्नगाधिराजत्वं युक्तमिति भावः। अत्र हिमवद्वर्णनस्य प्रकृतत्वात्तद्गतौषधिरत्ना-
नां द्वयानामपि प्रकृतत्वात्तेषां दोहनक्रियारूपसमानधर्मसंबन्धादौपम्यस्य-
गम्यत्वात्केवलप्रकृतविषयस्तुल्ययोगिता नामालंकारः। तदुक्तं। "प्रस्तुता-
नां तथान्येषां केवलं तुल्यधर्मतः। औपम्यं गम्यते यत्र सा मता तुल्ययोगिता॥"
न चात्र रूपकपरिणामाद्यलंकारशङ्का कार्या तेषामारोपहेतुत्वात्। हिमहेमाचला-
दिषु वत्सत्वदोग्धृत्वादीनामागमसिद्धत्वेनानारोप्यमाणत्वादिति।

ननु हिमदोषदूषितस्य तस्यात्यन्तमनभिगम्यत्वाच्छित्रेण इव सर्वमपि सौभाग्यं
विफलमित्याशङ्क्याह—

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः॥३॥

अनन्तेति॥ प्रभवत्यस्मादिति प्रभवः कारणं। अनन्तानामपरिमितानां रत्नानां श्रे-
ष्ठवस्तूनां प्रभवस्य यस्य हिमाद्रेर्हिमं। कर्तृ। सुभगस्य भावः सौभाग्यम्। "हृद्भगसिन्ध्व-
न्ते पूर्वपदस्य च" इत्युभयपदवृद्धिः। तद्विलुम्पतीति सौभाग्यविलोपि सौन्दर्यविघा-
तकं न जातं नाभूत्। तथाहि। एको दोषो गुणसंनिपाते इन्दोः किरणेष्वङ्क इव
निमज्जति। अन्तर्लीयत इत्यर्थः। नहि स्वल्पो दोषोऽमितगुणाभिभावक एव,
किंतु कश्चिदिन्दुकलङ्कादिव गुणै रभिभूयते। अन्यथा सर्वरम्यवस्तुहानिप्रसं-
गादिति भावः। अत्रोपमानुप्राणितोऽर्थान्तरन्यासोऽलंकारः। तल्लक्षणं तु—

ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किंचन। तत्साधन समर्थस्य न्यासो योऽन्यस्य वस्तुनः ॥ "इति दण्डी ॥ राम। राम॥ ६॥ ६॥

यश्चाप्सरोविभ्रममंडनानां संपादयित्रीं शिखरैर्बिभर्ति।
बलाहकच्छेदविभक्तरागामकालसंध्यामिव धातुमत्ताम्॥ ४॥

यश्चेति॥ किंचेति चकारार्थः। यो हिमाद्रिरप्सरसां विभ्रममंडनानि विलासालंकरणानि। अथवा विभ्रमो विपरीतन्यासः। "विभ्रमस्त्वरया काले भूषास्थानविपर्यये" इति दश रूपकात्। तेन मंडनानि तेषां संपादयित्रीं। एतद्धातुरागदर्शिन्योऽप्सरसः संध्याभ्रमेण प्रसाधनाय त्वरयंत इति भावः। तथात्वे भ्रान्तिमदलंकारो व्यज्यते। "कर्तृकर्मणोः कृति" इति कर्मणि षष्ठी। वारीणां वाहका बलाहकाः। पृषोदरादित्वात्साधुः। तेषां छेदेषु खंडेषु विभक्तः संक्रमितो रागो यया ताम्। एतेनाद्रेरभ्रंकषत्वं गम्यते। इदं विशेषणद्वयं संध्यायामपि योज्यम्। धातवः सिन्दूरगैरिकादयोऽस्य सन्तीति धातुमान्। नित्ययोगे मतुप्। तस्य भावो धातुमत्ता ताम्। धातुयोगित्वमिति संबंधोऽपि वाच्यार्थः। "समासकृत्तद्धितेषु संबंधाभिधानं भावप्रत्ययेन" इति वचनात्। लक्षणया नित्यानुषाङ्गिकधातुमित्यर्थः। अकालसंध्यामिवानियतकालप्राप्तसंध्यामिव शिखरैर् ~~बिभ~~ बिभर्ति धत्ते। अत्र संध्याशब्दस्य जातिवाचित्वाज्जात्युत्प्रेक्षा॥

आमेखलं संचरतां घनानां छायामधः सानुगतां निषेव्य।
उद्वेजिता वृष्टिभिराश्रयन्ते शृंगाणि यस्यातपवंति सिध्दाः॥ ५॥

आमेखलमिति॥ सिध्दा अणिमादिसिध्दा देवयोनिविशेषाश्च। "पिशाचो गुह्यकः सिध्दो भूतोऽमी देवयोनयः" इत्यमरः। आमेखलाभ्य आमेखलं नितंबपर्यन्तम्। मेखला खंडबन्धे स्याः काञ्ची शैलनितंबयोः" इति विश्वः। "आङ् मर्यादाभिविध्योः" इत्य

व्यधीशानः। संचरतां घनानां मेघानामधःसानूनि मेघमंडलादधस्तटानि गतां आसाम्। द्वितीया श्रितातीत पतित गतात्यस्त प्राप्तापन्नैः' इति समासः। छायामनातपम्। 'छाया सूर्यप्रिया कांतिः प्रतिबिंबमनातपः' इत्यमरः। निषेव्य वृष्टिभिरुद्वेजिताः क्लेशिताः सन्तः। 'उद्वेगस्तिमिते क्लेशे भये मंथरगामिनि' इति शब्दार्णवः। यस्य हिमाद्रेरातपवन्ति सानुपानि शृंगाण्याश्रयन्ते। आश्रित्य सेवन्ता इत्यर्थः। अतिमेघमंडलमस्योन्नत्यामिति भावः॥ रामचंद्रायनमः॥ राम॥५॥

पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम्।
विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः॥६॥

पदमिति यस्मिन्नद्रौ किराताः तुषारस्रुतिभिर्हिमानिस्यन्दैर्धौतं क्षालितं रक्तशोणितं यस्य तत्तथोक्तम्। अतो दुर्ग्रहमिति भावः। हता द्विपा गजा यैस्तेषां हतद्विपानाम् केसरिणां सिंहानां पदं पादप्रक्षेपस्थानमदृष्ट्वापि नखरन्ध्रैर्नखद्रोणीभिर्मुक्तैर्मुक्ताफलैर्मार्गं विदन्ति जानन्ति। अत्र व्याधाः सिंहघातिनो गजेन्द्राश्च मुक्ताकरा इति भावः। 'करीन्द्रजीमूतवराहशंखमत्स्याहिशुक्त्युद्भववेणुजानि मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि।' राम॥ राम॥ राम॥

न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः।
व्रजन्ति विद्याधरसुन्दरीणामनंगलेखक्रिययोपयोगम्॥७॥

न्यस्ताक्षरेति॥ यत्र हिमाद्रौ धातुरसेन सिन्दुरादिद्रवेण। 'शृंगारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः। न्यस्ताक्षरा लिखितवर्णा अत एव कुञ्जरस्य यौवनः काये वयोविशेषभाविनः पद्मकाख्याः। 'पद्मकं बिन्दुजालकम्' इत्यमरः। तद्वच्छोणा रक्तवर्णाः। लिखितभागे इति शेषः। भूर्जत्वचो भूर्जपत्रवल्कलानि। 'भूर्जपत्रो भुजो भूर्जो मृदुत्वक्चर्मिका अपि' इति यादवः। विद्याधरसुंदरी

णां। लिख्यन्ते येषु ते लेखाः पत्रिकाः। अनंगस्य लेखास्तेषां क्रियया। कामव्यंजकले-
खकरणेनेत्यर्थः। उपयोग उपकारं व्रजन्ति। दिव्यांगनाविहारयोग्योयं शैल इति भावः॥८॥

यः पूरयन्कीचकरन्ध्रभागान्दरीमुखोत्थेन समीरणेन।
उद्गास्यतामिच्छति किंनराणां तानप्रदायित्वमिवोपगन्तुम्॥८॥

य इति॥ यो हिमाद्रिः दरी गुहा सैव मुखं तस्मादुत्थेनोत्पन्नेन। "आतश्चोप
सर्गे" इति कप्रत्ययः। समीरणेन वायुना कीचका वेणुविशेषाः। "वेणवः कीच-
कास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरः। तेषां रन्ध्रभागाञ्छिद्रप्रदेशान्पूर-
यन्धमयन्। वांशिकोऽपि वंशरन्ध्राणि मुखमारुतेन पूरयतीति प्रसिद्धिः।
उद्गास्यतां देवयोनित्वादुच्चैर्गान्धारग्रामेण गानं करिष्यताम्। उक्तं च नारदेन

कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गंध सुरभीकरोति॥९॥

कपोलेति॥ यत्र हिमाद्रौ करिभिर्गजैः। कपोलकंडूर्गण्डस्थलकंडूर्विनेतुमपनेतुं
विघट्टितानां घर्षितानां सरलद्रुमाणां संबन्धि स्रुतानि करिकपोलघर्षणात्क्ष
रितानि क्षीराणि येषां तेषां भावस्तत्ता तया हेतुना प्रसूत उत्पन्नो गंधः सा-
नूनि सुरभीकरोती एतेनास्य गजाकरत्वं गम्यते। तथाच गजायुर्वेदे
"हिमवद्विन्ध्यमलया गजानां प्रभवा नगाः" इति॥ राम॥ राम॥

वनेचराणां वनितासखानां दरीगृहोत्संगनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः॥१०॥

"षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः। न तु गांधारनामानं स लभ्यो देवयोनिभिः॥" इति। किंनराणां देवगायकानां तानप्रदायित्वम्। ततो नाम स्वरान्तरप्रवर्तको रागस्थितिप्रवृत्त्यादिहेतुरंशापरनामा वंशवाद्यसाध्यः प्रधानभूतः स्वरविशेषः। "तानस्त्वंशस्वरो मतः" इत्यभिनवगुप्तः। "गातायं यं स्वरं गच्छेत्तं तं वंशेन तानयेत्" इति भरतः। तत्प्रदानशीलत्वं तानप्रदायित्वं वांशिकत्वमुपगन्तुमिच्छति वेत्युत्प्रेक्षा। सा च दरीमुखेत्यत्रैकदेशविवर्तिरूपकोज्जीविता। मुखसाध्यत्वात्तानप्रदायित्वस्य। यथावयवरूपणादवयविरूपणं गम्यते तदेकदेशविवर्तिरूपकं। गम्यते चात्रावयविनः पुंसो रूपणं यच्छब्दनिर्दिष्टे हिमाद्राविति संक्षेपः॥ ॥८॥ राम ॥

उद्वेजयत्यंगुलिपार्ष्णिभागान्मार्गे शिलीभूतहिमेऽपि यत्र।
न दुर्वहश्रोणिपयोधरार्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः॥११॥

उद्वेजयतीति॥ यत्र हिमाद्रौ। शिलीभूतं घनीभूतं हिमं यत्र तस्मिन्। अत एवांगुलीनां पार्ष्णीनां च भागान्प्रदेशानुद्वेजयत्यति शैत्यात्क्लेशयत्यपि मार्गे श्रोणयश्च पयोधराश्च श्रोणिपयोधरम्। दुर्वहेण दुर्धरेण श्रोणिपयोधरेणार्ताः पीडिताः। आङ्पूर्वादृच्छतेः क्तः। "उपसर्गादृति धातौ" इति वृद्धिः। अश्वानां मुखानीव मुखानि यासां ता अश्वमुख्यः किंनरस्त्रियः। उष्ट्रमुखवत्समासः। "स्यात्किंनरः किंपुरुषस्तुरंगवदनो मयुः" इत्यमरः। मन्दां मंथरां गतिं न भिन्दन्ति। न त्यजन्तीत्यर्थः। पादपीडाकारेऽप्यतिभारभंगुरशरीरतया न शीघ्रं गन्तुं शक्यत इति भावः॥११॥ राम॥ रामचंद्राय नमः॥

वनेचराणामिति यत्र हिमाद्रौ रजन्यां दर्यः कन्दरा एव गृहास्तेषामुत्संगेष्वभ्यन्तरेषु निषक्ताः संक्रान्तभासो यासां ता ओषधयस्तृणज्योतींषि। "अस्तं यातो ओषधीषु च तेजो निधाय रविरस्तं याति" इत्यागमः॥ वनितानां सखायो वनितासखाः। "राजाहःसखिभ्यष्टच्", तेषां रममाणानामित्यर्थः। वने चरन्तीति वनेचराः किराताः। "चरेष्टः" इति टप्रत्ययः। "तत्पुरुषे कृति बहुलम्" इत्यलुक्। तेषां वनेचराणाम्। अतैलपूराः। अनपेक्षिततैलसेका इत्यर्थः। सुरते सुरतकर्मणि प्रदीपा भवन्ति। अत्रौषधीष्वारोप्यमाणस्य प्रदीपत्वस्य प्रकृ~~तोपयोगित्वे~~त सुरतोपयोगित्वात्परिणामालंकारः। तदुक्तं— "आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः" इति तथा प्रदीपकारणतैलपूरणनिषेधादकारणकार्योत्पत्तिलक्षणा विभावना चेत्युभयोः संसृष्टिः ॥१०॥

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव ॥१२॥

दिवाकरादिति॥ यो हिमाद्रिर्दिवा दिवसे भीतं भयाविष्टमिव। उलूकमिवेति च ध्वनिः। गुहासु लीनमन्धकारं ध्वान्तम्। दिवा दिनं करोतीति दिवाकरस्तस्माद्दिवाकरात्। "दिवाविभानिशाप्रभाभास्कर-" इत्यादिना टप्रत्ययः। "भीत्रार्थानां भयहेतुः" इत्यपादानत्वात्पंचमी। रक्षति त्रायते। ननु क्षुद्रसंरक्षणमनर्हमित्याशंक्याह— क्षुद्र इति। उच्चैः शिरसामुन्नतानां शरणं प्रपन्ने शरणागते क्षुद्रे नीचेऽपि सति सज्जन इव नूनं ममत्वं ममायमित्यभिमानः। अस्तीति शेषः। ममशब्दात्त्वप्रत्ययः। अर्थान्तरन्यासोऽलंकारः ॥१२॥

लांगूलविक्षेपविसर्पिशोभैरितस्ततश्चंद्रमरीचिगौरैः।
यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति बालव्यजनैश्चमर्यः ॥१३॥

लांगूलेति ॥ चमर्यो मृगीविशेषा इतस्ततो लांगूलानि वालधयः। 'पुच्छोऽस्त्री लोम-
लांगूले वालहस्तश्च वालधिः' इत्यमरः। तेषां विक्षेपैर्विधूननैः विसर्पिण्यो वि-
सृमराः शोभनाः कान्तयो येषां तैश्चंद्रमरीचिभिरिव गौरैः शुभ्रैः। 'गौरः करीरे सिद्धार्थे
थैं शुक्ले पीतेऽरुणेऽपि च' इति यादवः॥ 'उपमानानि सामान्यवचनैः' इति समासः।
वालव्यजनैश्चामरैर्यस्य हिमाद्रेर्गिरिराजशब्दं गिरिराज इति संज्ञामर्थयुक्तमभिधेयवं-
तं कुर्वन्ति। राजानो हि छत्रचामरादिचिन्हिता इति भावः॥ १३॥

यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किंपुरुषांगनानाम्।
दरीगृहद्वारविलम्बिबिम्बास्तिरस्करिण्यो जलदा भवन्ति ॥१४॥

यत्रेति ॥ यत्र हिमाद्रौ। अंशुकाक्षेपेण वस्त्रापहरणेन विलज्जितानां किंपुरुषां-
गनानां किंनरस्त्रीणां यदृच्छया दैवगत्या दरीगृहद्वारेषु विलम्बि बिम्बालम्बमान
मण्डला जलदास्तिरस्करिण्यो जवनिका भवन्ति। 'प्रतिसीरा जवनिका स्या-
त्तिरस्करिणी च सा' इत्यमरः। 'तिरसोऽन्यतरस्याम्' इति सत्वम्। अत्र
जलदेष्वारोप्यमाणस्य तिरस्करिणीत्वस्य प्रकृतोपयोगित्वात्परिणामालंकारः॥ १४॥

भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः।
यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः ॥१५॥

भागीरथीती ॥ भागीरथीनिर्झरसीकराणां गंगाप्रवाहपाथकणानाम्। कर्मणि
षष्ठी। वोढा प्रापकः। वहेस्तृच्। मुहुः पुनः पुनः सद्यो वा। 'पौनः-पुन्ये भृशार्थे च
सद्यो वा स्यान्मुहुः पदम्' इति वैजयंती। कंपिता देवदारवो येन स तथोक्तः। भिन्ना-
नि विश्लेषितानि शिखण्डिनां बर्हाणि गतिबाधनार्थं किरातकटिबद्धानि येन स
तथोक्तः। क्रमाद्धि शेषणत्रयेण शैत्यसौरभ्यमान्द्यान्युक्तानि। यस्य हिमाद्रेर्वा-
युः। अन्विष्टमृगैर्मार्गितमृगैः। श्रान्तैरिति भावः। 'अन्विष्टं मार्गितं मृगितम्'
इत्यमरः। किरातैरासेव्यते॥ १५॥

१२

सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान्परिवर्तमानः ।
पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ॥१६॥

सप्तर्षीति ॥ सप्त च ते ऋषयश्च सप्तर्षयः । 'दिक्संख्ये संज्ञायाम्' इति समासः । तेषां हस्तैरवचितेभ्यो लूनेभ्योऽवशेषाण्यवशिष्टानि । 'शेषो प्रधाने संतापे त्रिष्वन्यत्रोपयुज्यते' इति केशवः । कर्मण्यण्प्रत्ययः । अनेन पद्मानां साफल्यं सूचितं । यस्य हिमाद्रेः रोहन्तीति रुहाणि । 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः । अग्र उपरि यानि सरांसि तेषु रुहाणि पद्मान्यधः परिवर्तमानो भ्रमन्विवस्वान्सूर्य ऊर्ध्वमुखैर्मयूखैः प्रबोधयति विकासयति । न कदाचिदधोमुखैः । अतिमात्रोन्नतत्वादिति भावः । सप्तर्षिमण्डलं ध्रुवादप्यूर्ध्वमिति ज्यौतिषिकाः । अतस्तेषामग्रसरोरुहभागित्वं युक्तम् ॥१६॥

यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च ।
प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥१७॥

यज्ञांगेति ॥ यस्य हिमाद्रेर्यज्ञांगानां यज्ञसाधनानां सोमलतादीनां योनिः प्रभवस्तस्य भावस्तत्त्वम् । 'यज्ञांगार्थं मया सृष्टो हिमवानचलेश्वरः' इति विष्णुपुराणात् । धरित्रीधरणक्षमं भूभारधरणयोग्यं सारं बलं च । 'सारो बले स्थिरांशे च' इत्यमरः । अवेक्ष्य ज्ञात्वा प्रजापतिः स्वयमेव कल्पितो यज्ञभागो यस्मिंस्तत्तथोक्तम् । 'सोमस्य राज्ञः कुरंग इन्दोः शृंगी समुद्रस्य शिशुमारो हिमवतो हस्ती' इति श्रुतेरिति भावः । शैलानामाधिपत्यमधिपतित्वम् । 'पत्यन्तपुरोहितादिभ्यो यक्' इति यक्प्रत्ययः । अन्वतिष्ठत् । ददाति स्मेत्यर्थः । उक्तं च ब्रह्माण्डपुराणे —

शैलानां हिमवन्तं च नदीनां चैव सागरम्। गंधर्वाणामधिपतिं चक्रे चित्ररथं विधिः ॥ इति।

समानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः।
मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे ॥१८॥

स इति ॥ मेरोः सखा मेरुसखः। बन्धुसंपन्न इति भावः। स्थितिज्ञो मर्यादाभिज्ञः। अनेन श्रुतसंपत्तिः सूच्यते। स हिमवान्पितॄणां मानसीं मानः संकल्पजन्यां मुनीनामपि माननीयाम्। योगिब्रह्मवादिभ्यां पूज्यामित्यर्थः। उक्तं च विष्णुपुराणे— तेभ्यः स्वधा सुते जज्ञे मेनका धारिणी तथा। ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज ॥ इति। आत्मानुरूपां कुलशीलसौन्दर्यादिभिः सदृशीं मेनां मेनका देवीति नामवतीं कन्यां कुलस्य स्थितये प्रतिष्ठायै विधिना यथाशास्त्रेणोपयेमे परिणीतवान्। "उपाद्यमः स्वकरणे" इत्यात्मनेपदम्। तेषां तु मानसी

नारद॥

मानसी कन्या मेना नाम महागिरेः। पत्नी हिमवतो यस्याः पुत्रो मैनाक उच्यते ॥ इति ब्रह्माण्डपुरा

कालक्रमेणाथ तयोः प्रवृत्ते स्वरूपयोग्ये सुरतप्रसङ्गे।
मनोरमं यौवनमुद्वहन्त्या गर्भोऽभवद्भूधरराजपत्न्याः ॥१९॥

कालक्रमेणेति ॥ अथ कालक्रमेण। गच्छता कालेनेत्यर्थः। तयोर्मेनकाहिमवतोः स्वरूपयोग्ये सौन्दर्यानुगुणे। यद्वा रूप्यते निरूप्यतेऽनेनेति रूपं शास्त्रं तद्योग्ये शास्त्रानुसारिणीत्यर्थः। सुरतप्रसंगे सुरतकर्मणि प्रवृत्ते सति मनोरमं यौवनमुद्वहन्त्या भूधरराजपत्न्या मेनकाया गर्भोऽभवत् ॥१९॥ समर्थं दर्शयन्नाह—

असूत सा नागवधूपभोग्यं मैनाकमम्भोनिधिबद्धसख्यम्।

क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्रावबेदनाज्ञं कुलिशक्षतानाम् ॥२०॥

असूतेति। सा मेना नागवधूपभोग्यम्। नागकन्यापरिणेतारमित्यर्थः॥ अम्भो-
निधिना बद्धसख्यं समुद्रकृतमैत्रिकं। सख्यमूलं सूचयति — पक्षच्छिदि पक्ष-
च्छेत्तरि। 'सत्सूद्विष-' इत्यादिना क्विप्प्रत्ययः। वृत्रशत्रौ क्रुद्धे कुपिते सत्य-
पि कुलिशक्षतानां वज्रप्रहाराणां। संबंधसामान्ये षष्ठी। जानातीति ज्ञः। 'इगुप-
धज्ञा-' इति कप्रत्ययः। वेदनानां ज्ञः। अथवा वेदना जानातीति वेदनाज्ञः।
'आतोऽनुपसर्गे कः' इति कप्रत्ययः। 'उपपदमतिङ्' इति समासः। स न भ-
वतीत्यवेदनाज्ञस्तम्। कुलिशक्षतवेदनानभिज्ञमित्यर्थः। सापेक्षत्वेऽपि ग-
मकत्वात्समासः। पक्षच्छेदोद्यतशक्रात्त्राणाय शरणागमनमनयोः सख्यमूलमि-
ति भावः। मैनाकं पुत्रमसूत। सर्वपर्वतपक्षच्छेदेऽप्ययमच्छिन्नपक्ष एवेति मै-
नाकस्योत्कर्षः। तादृक्पुत्रवत्त्वं हिमाद्रेरिति सार्थकं मैनाकस्य वर्णनम्। '

पिता न ज्ञायते यस्या भ्राता यदि न विद्यते। नोपयच्छेत्तु तां कन्यां धर्मज्ञोऽपभया-
त्सुधीः॥' इत्यभ्रातृककन्यापरिणयनिषेधात्प्रकृते पार्वती भ्रातृमत्येवेति सू-
चनार्थं मैनाकपर्वतमिति तात्पर्यार्थः॥२०॥

अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी।
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे ॥२१॥

अथेति॥ अथ मैनाकजननानन्तरं दक्षस्य प्रजापतेः कन्या भवस्य महादेव-
स्य पूर्वपत्नी पूर्वभार्या सती पतिव्रता। 'सती साध्वी पतिव्रता' इत्यमरः। स-
ती नाम देवी पितुर्दक्षस्य। कर्तरि षष्ठी। अवमानेन स्वभर्त्रवज्ञया प्रयुक्ता प्रेरिता
योगेन योगमार्गेण विसृष्टदेहा त्यक्तदेहा सती। जन्मने पुनरुद्भवाय तां शैल-
वधूं मेनकां प्रपेदे। अत्र पुरा किल सती देवी दक्षाध्वरे तत्कृतां स्वभर्त्रवज्ञामस-

हमाना पितरं प्रसंच्योपेक्ष्य मत्कर्तव्यकार्यं त्वज्जामातैव करिष्यतीति निर्धार्य देवकार्याणि साधयितुं च योगाग्निना स्वशरीरं ददाहेति पुरावृत्तकथानुसंधेया ॥२१॥

सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या ।
सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्साहगुणेन संपत् ॥२२॥

सेति ॥ भव्या कल्याणी सा सती भूधराणामधिपेन हिमवता समाधिमत्यां नियमवत्यां तस्यां मेनकायां सम्यक्प्रयोगात्साध्वाचरणाद्धेतोरपरिक्षतायामभ्रष्टायां नीतावुत्साहगुणेनोत्साहशक्त्या । कर्त्रा । संपदिवोदपादि उत्पादिता । उत्पद्यतेर्ण्यन्तात्कर्मणि लुङ् । "चिण्भावकर्मणोः" इति चिण्प्रत्ययः । "चिणो लुक्" इति तस्य लुक् ॥२२॥ रामचंद्रायनमः ॥ छ ॥

प्रसन्नदिक्पांसुविविक्तवातं शंखस्वनानंतरपुष्पवृष्टि ।
शरीरिणां स्थावरजंगमानां सुखाय तज्जन्मदिनं बभूव ॥२३॥

प्रसन्नेति ॥ प्रसन्ना निर्मला दिशो यस्मिंस्तत्प्रसन्नदिक् । पांसुविविक्तो रजोरहितो वातो यस्मिंस्तत्तथोक्तम् । शंखस्य स्वनात्स्वनस्य वानंतरं पुष्पवृष्टिर्यस्मिंस्तत्तथोक्तं तस्याः पार्वत्या जन्मदिनम् । स्थितिशीलाः स्थावराः शैलवृक्षादयः । "स्थेशभासपिसकसो वरच्" इति वरच्प्रत्ययः । जंगम्यंते भृशं गच्छंतीति जंगमा देवतिर्यङ्मनुष्यादयः । स्थावराश्च जंगमाश्च तेषां द्वयानामपि शरीरिणां सुखायानंदाय बभूव ॥

तया दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकासे ।
विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव ॥२४॥

तयेति ॥ स्फुरत्प्रभामण्डलया तया दुहित्रा सवित्री जननी मेना । "स्वरतिसूति-स्रूयति धूञूदितो वा" इतीडागमः । विदूरस्याद्रेः प्रांतभूमिर्विदूरभूमिः । आविदुरं विदूरस्य गिरेरत्तुंगस्तेपसः । क्वांकताजीयसीमांते मणी नामाकरोऽभवेत् ॥ इति बुधः । नवमेघशब्दादुद्भिन्नया रत्नशलाकया रत्नांकुरेण सुतरां चकाशे रराज ॥२४॥

दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान्विशेषान्ज्योत्स्नान्तराणीव कलान्तराणि ॥

दिन इति ॥ लब्ध उदयो यया सा लब्धोदया । उत्पन्नेत्यर्थः । अन्यत्रोदितेत्यन्यत्र दिने दिने प्रतिदिनं । "नित्यवीप्सयोः" इति वीप्सायां द्विरुक्तिः । परिवर्धमाना । उभयत्र समानमेतत् । सा बाला । चन्द्रमस इयं चान्द्रमसी लेखेव लावण्यमया

न्कान्ति विशेषप्रचुरान् । "मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदंगेषु तल्लावण्यमिहोच्यते ॥" इति भट्टपादः । विशेषानवयवान् । "विशेषोऽवयवे व्यक्तौ" इत्युत्पलमालायाम् । ज्योत्स्नाया अन्तरमन्तर्धानं येषां तानि ज्योत्स्नान्तराणि ज्योत्स्नया नान्तर्हितानि । तथा न्यस्यानीति यावत् । अन्यः कलाः कलान्तराणि तु । सुप्सुपेति समासः । "स्यादात्मीयान्यतादर्थ्यरन्ध्रान्तर्धिषु चान्तरम्" इति शाश्वतः । पुपोषोपचितवती । इयं वाक्योपमेत्याह दण्डी । तल्लक्षणं तु — "वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते । एकानेकेवशब्दत्वात्सा तु वाक्योपमा द्विधा ॥" इति ॥२५॥

तां पार्वतीत्याभिजनेन नाम्ना बंधुप्रियां बंधुजनो जुहाव ।
उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम ॥२६॥

तामिति॥ बंधुप्रियां तां मात्रा बंधुजनः पित्रादिः। आभिजनादभिगतेनाभिजनेन पित्रादिपूर्वसंबंधोपाधिकेनेत्यर्थः। "आभिजनः पूर्वबांधवाः" इति काशिका। नाम्ना। पर्वतस्यापत्यं स्त्री पार्वती। "तस्यापत्यं" इत्यण्प्रत्ययः। इति आहवाहूतवान्। ह्वयतेर्लिटि रूपम्। पर्वतजन्यत्वोपाधिना पार्वतीति नाम्ना प्राबोधिदिति भावः। पश्चादभिजननामप्रवृत्त्यनंतरं मात्रा जनन्या। उ इति संबोधने। "उ इति वितर्कसंबोधनपादपूरणेषु" इति गणव्याख्याने। मा इति निषेधे। उ हे वत्से मा मा कुर्विति एवं रूपेण। तपसस्तपश्चर्यायाः। "वारणार्थानामीप्सितः" इत्यपादानत्वात्पंचमी। निषिद्धा निवारिता सती सुमुखी सा बाला उमेत्याख्यां नामधेयमुपाजगाम ॥२६॥

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम्।
अनंतपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसंगा ॥२७॥

महीभृत इति॥ पुत्राश्च दुहितरश्च पुत्राः। "भ्रातृपुत्रौ स्वसृदुहितृभ्याम्" इत्येकशेषः। तेऽस्य सन्तीति पुत्रवान्। भूमार्थे मतुप्। तस्य पुत्रवतोऽपि। न त्वनपत्यस्येत्यर्थः। महीभृतो हिमाद्रेर्दृष्टिश्चक्षुस्तस्मिन्नपत्ये तोके। "अपत्यं तोकं तयोः समे" इत्यमरः। तस्यां पार्वत्यामित्यर्थः। तृप्तिं न जगाम। तथाहि अनंतपुष्पस्य नानाविधकुसुमस्यापि मधोर्वसंतस्य संबंधिनी द्विरेफमाला भृंगपंक्तिश्चूतस्य विकारे चूते चूतकुसुमे। "अवयवे च प्राण्योषधिवृक्षेभ्यः" इति विकारार्थोत्पन्नस्याण्प्रत्ययस्य लुक्प्रकरणे "पुष्पमूलेषु बहुलं" इति पठनाल्लुक्। सविशेषः सातिशयः संगो यस्याः सा तथोक्ता। अत्यन्तासक्तेत्यर्थः ॥२७॥ धु॥

प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः।
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ॥२८॥

प्रभेति ॥ प्रभामहत्या प्रकाशाधिकया शिखया ज्वालया दीप इव। शिखादीपयोरव-
यवावयविभावाद्भेदेन व्यपदेशः। त्रयो मार्गा यस्याः तया त्रिमार्गया मंदाकिन्या।
तृतीया प्रकृत्यादिभ्य इति त्रिदिवः स्वर्गः। वृत्तिविषये त्रिशब्दस्य ... पूरणार्थत्वम्।
पृषोदरादित्वादिशब्दादकारागमः। पुंस्त्वं लोकात्। दीव्यन्ते यत्रार्थी कोविदाः दीव्य
न्त्यत्र जना इति क्षीरस्वामी। तस्य मार्ग इव। संस्कारो व्याकरणजन्या शुद्धिस्तद्वत्या गिरा
वाचा। 'अदैशांतलक्ष्मीर्निहिता पिनाकि' इति श्रुतेरिति भावः। मनस ईशा सारस्या स्तीति म-
नीषी विद्वानिव ... न्ध्यादित्वात्साधुः। तस्याः पार्वत्याः स हिमवान्पूतः शोधितश्च
विभूषितश्च। अत्र शिखागिरोः शिष्ययोरुपमानानर्हत्वान्न विशेषणाधिक्यदोषः।
इयं मालोपमा ॥२८॥ ५५॥

मंदाकिनीसैकतवेदिकाभिः सा कंदुकैः कृत्रिमपुत्रकैश्च।
रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये ॥२९॥

मंदाकिनीति ॥ सा पार्वती बाल्ये वयसि क्रीडानां रसः स्वादः। रुचिरिति यावत्।
तं क्रीडारसं। 'रसो गंधे रसः स्वादे' इति विश्वः। निर्विशतीव भुञ्जानेव। 'निर्वेशो
भृतिभोगयोः' इति विश्वः। 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः। सखीनां
मध्यगता सती मंदाकिन्याः सैकतेषु पुलिनेषु वेदिकाभिः कंदुकैः। क्रियया निर्वृत्तैः
कृत्रिमैः। 'ड्वितः क्त्रिः' इति क्त्रिप्रत्ययः 'क्त्रेर्मम्नित्यम्' इति मबागमश्च। पुत्रकैः पाञ्चा
लिकाभिः। 'पाञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता' इत्यमरः। 'संज्ञायां
कन्' इति कन्प्रत्ययः। मुहुः पुनः पुना रेमे ॥२९॥ ५॥ २॥

तां हंसमालाः शरदीव गंगां महौषधिं नक्तमिवात्मभासः
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥३०॥

तामिति ॥ स्थिरः स्थेयोपदेशः प्रभवनीयो यस्यास्तां दृढशिक्षाम्। मेधाविनीमित्य-
र्थः। तां पार्वतीमुपदेशकाले प्राक्तनजन्मविद्याः। पूर्वजन्माभ्यस्तविद्या इत्यर्थः।
शरदि गंगां हंसमालाश्च नक्तं रात्रौ महौषधिं तृणज्योतिषमात्मभासः स्वदीप्त-
य इव प्रपेदिरे। उपमानसामर्थ्यादुपदेशमन्तरेणैवेति गम्यते ॥३०॥

असंभृतं मण्डनमंगयष्टेरनासवाख्यं करणं मदस्य।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वय प्रपेदे ॥३१

असंभृतमिति ॥ अथ सा पार्वती अंगयष्टेरसंभृतमयत्नसिद्धं मंडनं प्रसाधनमना-
सवाख्यमासवाख्यारहितं मदस्य कारणं साधनं कामस्य पुष्पव्यतिरिक्तमस्त्रम-
स्त्रभूतं बाल्याच्छैशवात्परमनंतरभावि वयो यौवनं प्रपेदे प्राप। यौवनेनैव हि युवतयः
प्रसाध्यंते माद्यंते काम्यंते चेति भावः। अत्र द्वितीयपादे आसवरूपकारणाभावेऽपि

तत्कार्यमदोक्तेर्विभावनालंकारः। तदुक्तं — 'कारणाभावे कार्योत्पत्तिर्विभावना' इति।
प्रथमतृतीययोरलंकारोपमानयोर्मंडनमदनास्त्रत्वयोः प्रकृतोपयोगात्परि-
णामालंकारः। तल्लक्षणं तूक्तम् ॥३१॥

उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविंदम्।
बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन ॥३२॥

उन्मीलितमिति ॥ नवयौवनेन प्रथमयौवनेन विभक्तं साभिव्यक्तांगम्। पीनजघनादि-
सुस्थानमित्यर्थः। तस्याः पार्वत्या वपुस्तूलिकया कूर्चिकया। शलाकयेत्यर्थः। 'तु-
लिका कथिता लेख्यकूर्चिका तूलशय्ययोः' इति विश्वः। उन्मीलितं रञ्जनद्रव्येणो-
द्भासितं समुत्कीर्णं। रूपमिवालेख्यम्। चित्रमालेख्यमिव। सूर्यांशुभिर्भिन्नं विक-
सितमरविंदं पद्ममिव। चतुरस्रमन्यूनातिरिक्तं यथा
तथा शोभत इति चतुरस्रशोभि। तस्योल्लिखितेति बभूव। चित्रारवि

न्द्यो सरलिका तरणिके स्पर्शेन न्य इव स्वतः उत्पद्यते वा भवतोः अस्य सौभाग्य प्रादुर्भावो ऽभिव्यक्तो भवतीत्यर्थः ॥ ३२ ॥

अभ्युन्नताङ्गुष्ठनखप्रभाभिर्निक्षेपणाद्रागमिवोद्गिरन्तौ ।
आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम् ॥ ३३ ॥

अभ्युन्नतेति ॥ अभ्युन्नतयोरङ्गुष्ठनखयोः प्रभाभिर्निमित्तेन निक्षेपणान्निभरन्न्यासाद्धेतोः रागमन्तर्गतं लौहित्यम् । रागः क्लेशादिके रक्ते मात्सर्ये लोहितादिषु इति शाश्वतः । उद्गिरन्तौ वमन्तौ । बहिर्निःसारयन्ताविव स्थितावित्यर्थः । अत्रोद्गिरते गौणार्थत्वान्न ग्राम्यतादोषः प्रत्युत गुण एव । यथाह दण्डी— निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥ इति ॥ तस्याश्चरणौ तच्चरणौ । पृथिव्यामव्यवस्थां स्थलस्पर्शरहितां संचारिणीमित्यर्थः । स्थ